अस्य ध्यानम् ।
"मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम् ।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं भजे ॥"
अस्य पुरश्चरणं त्रिलक्षसंख्यकजपः ॥*॥ मन्त्रान्तरम् । गं क्षिप्रप्रसादनाय नमः । तथा च विवस्ते ।
"संवर्त्तको नेत्रयुतः पार्श्वो वह्न्यासने स्थितः ।
प्रसादनाय नमसः सबीजाद्यो दशाक्षरः ॥"
अस्य ध्यानम् ।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत् स्वशुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलि-
र्हारोज्ज्वलो हस्तिमुखोऽवतान्नः ॥"
अस्य पुरश्चरणं लक्षजपः ॥ * ॥ अथ हरिद्रागणेशमन्त्रः ।
"पञ्चान्तको धरासंस्थो विन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्व्वकामफलप्रदः ॥"
ध्यानम् ।
"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥"
अस्य पुरश्चरणं चतुर्लक्षजपः । इति तन्त्रसारः ॥ * ॥ ( पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ७१ ।
"करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥"
विगतो नायको यस्येति विग्रहे अनाथे, त्रि । )

**विनायिका**, स्त्री, ( विनायकस्य स्त्री । भार्य्यार्थे ङीप् । ) गरुड़पत्नी । इति शब्दमाला ॥

**विनारुहा**, स्त्री, ( विना आश्रयं रोहतीति । रुह + कः । स्त्रियां टाप् । ) त्रिपर्णिका । इति राजनिर्घण्टः ॥

**विनाशः**, पुं, ( विनशनमिति । वि + नश + घञ् । ) विनशनम् । ( यथा, गीतायाम् । २ । १७ ।
"अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ॥")
तत्पर्य्यायः । अदर्शनम् २ । इत्यमरः ॥ कुत्सट् ३ । यथा, श्रीभागवते ।
"एषा घोरतमा सन्ध्या लोककुत्सट्करी विभो ॥"
कुत्सट्विषयं विनाशं वर्त्तते । इति श्रीधरस्वामी ॥

**विनाशकः**, त्रि, विनाशकर्त्ता । विपूर्व्वकनशधातोर्णक(ण्वुल्)प्रत्ययेन निष्पन्नः ॥ ( यथा, महाभारते । १२ । ६१ । ८ ।
"राजैव कर्त्ता भूतानां राजैव च विनाशकः ।
धर्म्मात्मा यः स कर्त्ता स्यादधर्म्मात्मा विनाशकः ॥")

**विनाशी**, [न्] त्रि, विनाशकरणशीलः । विपूर्व्वनशधातोर्णिनृप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १२ । १०७ । ११ ।
"लोभमेको हि वृणुते ततोऽमर्षमनन्तरम् ।
तौ क्षयव्ययसंयुक्तावन्योन्यस्य विनाशिनौ ॥"
यथा च मनौ । १ । २७ ।
"अण्व्यो मात्राविनाशिन्यो दशार्द्धानान्तु याः स्मृताः ।
ताभिः सार्द्धमिदं सर्व्वं सम्भवत्यनुपूर्व्वशः ॥")

**विनाशोन्मुखं**, त्रि, ( विनाशाय पतनाय उन्मुखम् । ) पक्वम् । इत्यमरः ॥ नाशोद्यतञ्च ॥

**विनासकः**, त्रि, ( विगता नासा यस्य । बहुव्रीहौ कप् ह्रस्वश्च ।) गतनासिकः । इति जटाधरः ॥

**विनाहः**, पुं. ( विशेषेण नह्यते अनेन । वि + नह + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) कूपाननपिधानकः । इति शब्दरत्नावली ॥

**विनिक्षिप्तः**, त्रि, विनिक्षेपाश्रयः । परित्यक्तः । विनिपूर्व्वकक्षिपधातोः क्तप्रत्ययेन निष्पन्नः ॥ ( यथा, देवीभागवते । २ । ८ । २७ ।
"पितुः कण्ठेऽद्य मे येन विनिक्षिप्तो मृतोरगः ॥")

**विनिगमना**, स्त्री, एकतरपक्षपातिनी युक्तिः । एकतरावधारणा । यथा । उच्यते । एकदेशोपात्तस्यैव भूहिरण्यादावनुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः । इति दायभागः ॥ उच्यत इति भूहिरण्यादावुत्पन्नस्य एकदेशोपात्तस्य तत्तदंशावच्छिन्नस्य विनिगमना इदममुकस्य नान्यस्येत्यवधारणरूपा तत्प्रमाणाभावेन वैशेषिकव्यवहारः परस्परनैरपेक्ष्येण दानविक्रयादिलक्षणस्तदनर्हतया अव्यवस्थितस्य सतोऽव्यक्तरूपस्य गुटिकापातादिना व्यञ्जनं इदं अमुकस्येत्यवधारणं विभाग इत्यर्थः । इति तट्टीकायां श्रीकृष्णतर्कालङ्कारः ॥

**विनिद्रः**, त्रि, ( विगता निद्रा मुद्रणा यस्य । ) उन्मीलितः । इति शब्दमाला ॥ (यथा, नैषधे । १ । ३४ ।
"विनिद्ररोमाजनि शृण्वती नलम् ॥"
तथा च साहित्यदर्पणे । १० परिच्छेदे ।
"उत्पत्तिरिन्दोरपि निष्फलैव
दृष्टा विनिद्रा नलिनी न येन ॥")
निद्रारहितः । (यथा, महाभारते । ३ । २८५ । २१ ।
"स्वस्थमासीनमव्यग्रं विनिद्रं राक्षसाधिपः ।
ततोऽब्रवीद्दशग्रीवः कुम्भकर्णं महाबलम् ॥")

**विनिद्रत्वं**, क्ली, ( विनिद्रस्य भावः । ) प्रबोधः । इति हेमचन्द्रः ॥ निद्रारहितत्वञ्च ॥

**विनिपातः**, पुं, (विशेषेण निपतनम् । वि + नि + पत + घञ् ।) निपातः । दैवादिव्यसनम् । इति मेदिनी । ते, २१७ ॥ अवमानः । इति हेमचन्द्रः ॥ ( यथा, मनौ । ४ । १४६ ।
"मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम् ।
जपतां जुह्वताञ्चैव विनिपातो न विद्यते ॥")

**विनिमयः**, पुं, ( वि + नि + मी + अप् । ) परिदानम् । प्रतिदानम् । इति शब्दरत्नावली ॥ ( यथा, रघुः । १ । २६ ।
"दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥")
बन्धकः । इति शब्दमाला ॥ यथा,—
"विक्रयेणां विनिमयैर्दत्त्वा गोमांसखादके ।
व्रतं चान्द्रायणं कुर्य्याद्वधे साक्षाद्वधी भवेत् ॥"
इति प्रायश्चित्ततत्त्वधृतगोभिलवचनम् ॥

**विनियोगः**, पुं, ( वि + नि + युज् + घञ् । ) फले अर्पणम् । इति हेमचन्द्रः ॥ विनियोजनम् । यथा,—
"अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः ॥"
इत्याह्निकतत्त्वम् ॥
( यथा, सन्ध्याविधौ ।
"ॐकारस्य ब्रह्मऋषिर्गायत्रीच्छन्दः सविता देवता प्राणायामे विनियोगः ॥" )

**विनियोजितः**, त्रि, विनियुक्तः । विनिपूर्व्वण्यन्तयुजधातोः क्तप्रत्ययेन निष्पन्नः ॥

**विनिर्धूतः**, त्रि, ( वि + निर् + धू + क्तः । ) दूरवस्थया चलितः । यथा,—
"ततो देवा विनिर्धूता असुराभ्याः पराजिताः ।
हृताधिकाराक्षिदशास्ताभ्यां सर्व्वे निराकृताः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

**विनिर्भयः**, पुं, ( विशेषेण निर्गास्ति भयं यस्य । ) साध्यगणविशेषः । यथा,—
"मनो मन्ता तथा प्राणो नरो यानश्च वीर्य्यवान् ।
विनिर्भयो नयश्चैव हंसो नारायणो वृषः ।
प्रभुश्चेति समाख्याताः साध्याः द्वादश मौर्व्विकाः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥
भयरहितश्च ॥

**विनिर्म्मोकः**, पुं, अतिरेकः । यथा । दिवाकरवारविनिर्म्मोके तु गर्भः । इति चूड़ाप्रकरणे ज्योतिस्तत्त्वम् ॥ (विगतो निर्म्मोको यस्य इति विग्रहे मुक्तकञ्चुके, त्रि ॥)

**विनिर्वृत्तः**, त्रि, समाप्तः । निष्पन्नः । विनिर्पूर्व्वकवृतुधातोः क्तप्रत्ययेन निष्पन्नः ॥

**विनिवृत्तः**, त्रि, निवृत्तिविशिष्टः । श्रान्तः । निरस्तः । विनिपूर्व्वकवृतुधातोः क्तप्रत्ययेन निष्पन्नः ॥ ( यथा, गीतायाम् । १५ । ५ ।
"निर्म्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ॥")

**विनिहतः**, त्रि, विनष्टः । विनिपूर्व्वकहनधातोः क्तप्रत्ययेन निष्पन्नः ॥

**विनीतः**, त्रि, ( वि + नी + क्तः । ) विनयान्वितः । विनयः शास्त्रतः संस्कारः इन्द्रियजयो वा ।